# ॥ શ્રી રામ રક્ષા સ્તોત્રમ્ ॥

અસ્ય શ્રીરામ રક્ષા સ્તોત્રમન્ત્રાસ્ય બુદ્ધકૌશિક ઋષિઃ શ્રી સીતારામચંદ્રો દેવતા અનુષ્ટુપ છંદઃ સીતા શક્તિઃ શ્રીમાન હનુમાન કીલકં શ્રીરામચંદ્ર પ્રીત્યર્થે રામરક્ષા સ્તોત્રજપે વિનિયોગઃ

ધ્યાનમ્

ધ્યાયેદાજાનુબાહું ધૃતશરધનુષં બદ્ધ પદ્માસનસ્થં
પીતં વાસો વસાનં નવકમલદલસ્પર્ધિનેત્રં પ્રસન્નમ્
વામાંકારુઢસીતામુખકમલમિલલ્લોચન નીરદાભં
નાનાલંકારદીપ્તંદધતમુરુજટામંડલં રામચંદ્રમ્

ચરિતં રઘુનાથસ્ય શતકોટિ પ્રવિસ્તરમ્
એકૈકમક્ષરં પુંસાં મહાપાતકનાશનમ્ ૧

ધ્યાત્વા નિલોત્પલશ્યામં રામં રાજીવલોચનમ્
જાનકી લક્ષ્મણોપેતં જટામુકુટ મંડિતમ્ ૨

સાસિતૂણધનુર્બાણપાણિં નક્તંચરાન્તકમ્,
સ્વલીલયા જગત્રાતુમાવિર્ભૂતમજં વિભુમ્. ૩

રામરક્ષાં પઠેત્પ્રાજ્ઞઃ પાપઘ્નીં સર્વકામદામ્,
શિરો મે રાઘવઃ પાતુ ભાલં દશરથાત્મજઃ. ૪

કૌશલ્યેયો દશૌ પાતુ વિશ્વામિત્રપ્રિયઃ શ્રુતી,
ઘ્રાણં પાતુ મખત્રાતા મુખં સૌમિત્રિવત્સલઃ ૫

જિહ્વાં વિદ્યાનિધિઃ પાતુ કણ્ઠં ભરતવન્દિતઃ
સ્કન્ધૌ દિવ્યાયુધઃ પાતુ ભુજૌ ભગ્નેશકાર્મુકઃ ૬

કરૌ સીતાપતિઃ પાતુ હૃદયં જામદગ્ન્યજિત્,
મધ્યં પાતુ ખરધ્વંસી નાભિં જામ્બવદાશ્રયઃ ૭

સુગ્રીવેશઃ કટી પાતુ સક્થિની હનુમત્પ્રભુઃ
ઊરુ રઘુત્તમઃ પાતુ રક્ષઃકુલવિનાશકૃત. ૮

જાનુની સેતુકૃત્પાતુ જંઘે દશમુખાન્તકઃ
પાદૌ વિભીષણશ્રીદઃ પાતુ રામોઽખિલં વપુઃ ૯

એતાં રામબલોપેતાં રક્ષાં યઃ સુકૃતી પઠેત્,
સચિરાયુઃ સુખી પુત્રી વિજયી વિનયી ભવેત. ૧૦

પાતાલભૂતલવ્યોમચારિણશ્છદ્મચારિણઃ
ન દ્રષ્ટુમપિ શક્તાસ્તે રક્ષિતં રામનામભિઃ ૧૧

રામેતિ રામભદ્રેતિ રામચન્દ્રેતિ વા સ્મરન્,
નરો ન લિપ્યતે પાપૈર્ભુક્તિં મુક્તિં ચ વિન્દતિ. ૧૨

જગજ્જૈત્રૈકમન્ત્રેણ રામનામ્નાભિરક્ષિતમ્,
યઃ કણ્ઠે ધારયેત્તસ્ય કરસ્થાઃ સર્વસિદ્ધયઃ ૧૩

વજ્રપંજરનામેદં યો રામકવચં સ્મરેત્,
અવ્યાહતાજ્ઞઃ સર્વત્ર લભતે જયમંગલમ્. ૧૪

આદિષ્ટવાન યથા સ્વપ્ને રામરક્ષામિમાં હરઃ
તથા લિખિતવાન્ પ્રાતઃ પ્રબુદ્ધો બુદ્ધકૌશિકઃ ૧૫

આરામ કલ્પવૃક્ષાણાં વિરામઃ સકલાપદામ્,
અભિરામસ્ત્રિલોકાનાં રામઃ શ્રીમાન્સ નઃ પ્રભુઃ ૧૬

તરુણૌ રૂપસમ્પન્નૌ સુકુમારૌ મહાબલૌ,
પુંડરીક-વિશાલાક્ષૌ ચીરકૃષ્ણાજિનામ્બરૌ. ૧૭

ફલમૂલાશિનૌ દાન્તૌ તાપસૌ બ્રહ્મચારીણૌ,
પુત્રૌ દશરથસ્યૈતૌ ભ્રાતરૌ રામલક્ષ્મણૌ. ૧૮

શરણ્યૌ સર્વસત્ત્વાનાં શ્રેષ્ઠૌ સર્વધનુષ્મતામ્,
રક્ષઃકુલનિહન્તારૌ ત્રાયેતાં નો રઘૂત્તમૌ. ૧૯

આત્તસજ્જધનુષાવિષુસ્પૃશાવક્ષયાશુગનિષંગસંગિનૌ,
રક્ષણાય મમ રામલક્ષ્મણાવગ્રતઃ પથિ સદૈવગચ્છતામ્. ૨૦

સન્નદ્ધઃ કવચી ખંગી ચાપબાણધરો યુવા,
ગચ્છન્મનોરથાન્નશ્ચ રામઃ પાતુ સલક્ષ્મણઃ ૨૧

રામો દાશરથિઃ શૂરો લક્ષ્મણાનુચરો બલી,
કાકુત્સ્થઃ પુરુષઃ પૂર્ણઃ કૌસલ્યેયો રઘુત્તમઃ ૨૨

વેદાન્તવેદ્યો યજ્ઞેશઃ પુરાણપુરુષોત્તમઃ
જાનકીવલ્લભઃ શ્રીમાનપ્રમેય પરાક્રમઃ ૨૩

ઈત્યેતાનિ જપન્નિત્યં મદ્ભક્તઃ શ્રદ્ધયાન્વિતઃ
અશ્વમેધાધિકં પુણ્યં સંપ્રાપ્નોતિ ન સંશયઃ ૨૪

રામં દૂર્વાદલશ્યામં પદ્માક્ષં પીતવાસસમ્,
સ્તુવન્તિ નામભિર્દિવ્યૈર્ન તે સંસારિણો નરાઃ ૨૫

રામં લક્ષ્મણપૂર્વજં રઘુવરં સીતાપતિં સુન્દરમ્,
કાકુત્સ્થં કરૂણાર્ણવં ગુણનિધિંવિપ્રપ્રિયંધાર્મિકમ્
રાજેન્દ્રં સત્યસંધં દશરથતનયં શ્યામલંશાન્તમૂર્તિં
વન્દેલોકાભિરામં રઘુકુલતિલકંરાઘવંરાવણારિમ્ ૨૬

રામાય રામભદ્રાય રામચંદ્રાય વેધસે,
રઘુનાથાય નાથાય સીતાયાઃપતયે નમઃ ૨૭

શ્રીરામ રામ રઘુનંદન રામ રામ
શ્રીરામ રામ ભરતાગ્રજ રામ રામ
શ્રીરામ રામ રણકર્કશ રામ રામ
શ્રીરામ રામ શરણં મમ રામ રામ. ૨૮

શ્રીરામચન્દ્રચરણૌ મનસા સ્મરામિ,
શ્રીરામચન્દ્રચરણૌ વચસા ગૃણામિઃ
શ્રીરામચન્દ્રચરણૌ શિરસા નમામિ,
શ્રીરામચન્દ્રચરણૌ શરણં પ્રપદ્યે. ૨૯

માતા રામો મત્પિતા રામચન્દ્રઃ
સ્વામી રામો મત્સખા રામચન્દ્રઃ
સર્વસ્વં મે રામચન્દ્રો દયાલુ-
ર્નાન્યં જાને નૈવ જાને ન જાને. ૩૦

દક્ષિણે લક્ષ્મણો યસ્ય વામે ચ જનકાત્મજા,
પુરતો મારુતિર્યસ્ય તં વંદે રઘુનંદનમ્. ૩૧

લોકાભિરામંરણરંગધીરં રાજીવનેત્રં રઘુવંશનાથમ્
કારુણ્યરુપંકરૂણાકરં તં શ્રીરામચન્દ્રં શરણં પ્રપદ્યે. ૩૨

મનોજવંમારુતતુલ્યવેગં જિતેન્દ્રિયં બુદ્ધિમતાં વરિષ્ઠમ્
વાતાત્મજં વાનરયૂથમુખ્યં શ્રીરામદૂતં શરણં પ્રપદ્યે. ૩૩

કૂજન્તં રામરામેતિ મધુરં મધુરાક્ષરમ્,
આરુહ્ય કવિતાશાખાં વન્દે વાલ્મીકિકોકિલમ્. ૩૪

આપદામપહર્તારં દાતારં સર્વસમ્પદામ્,
લોકાભિરામં શ્રીરામં ભૂયો ભૂયો નમામ્યહમ્. ૩૫

ભર્જનં ભવબીજાનામર્જનં સુખસમ્પદામ્,
તર્જનં યમદૂતાનાં રામ રામેતિ ગર્જનમ્. ૩૬

રામોરાજમણિઃ સદા વિજયતે રામં રમેશં ભજે,
રામેણાભિહતા નિશાચરચમૂ રામાય તસ્મૈ નમઃ,
રામાન્નાસ્તિ પરાયણં પરતરં રામસ્ય દાસોઽસ્મ્યહં,
રામેચિત્તલયઃ સદા ભવતુ મે ભો રામ મામુદ્ધરઃ. ૩૭

રામ રામેતિ રામેતિ રમે રામે મનોરમે,
સહસ્ત્રનામ તત્તુલ્યં રામનામ વરાનને. ૩૮

॥ ઈતિ શ્રી બુધકૌશિક મુનિ વિરચિતં શ્રી રામરક્ષા સ્તોત્ર સંપૂર્ણમ્ ॥

॥ ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥